श्री पार्वती श्रीकंठ स्तुतिः

श्री पार्वती श्रीकंठ स्तुतिः

(श्रीगरलपुरप्रवेशकाले)
आसन्बहवो घस्रा मातस्त्वच्चरणदर्शनं हित्वा
पार्वति कृतार्थतां खलु गमितस्त्वत्पाददर्शनादद्य ||1||

सच्चित्सुखस्वरूपां ब्रह्मैतत्पश्यतेंदुशीर्षाख्यं |
इति वदति शैलतनया साक्षान्नूनं प्रसारितांगुल्या ||2||

भक्तानां पापवृक्षौघच्छेदनायेंदुशेखर |
बिभर्षि पट्टसं रत्नत्सरुं किं लोकशंकर ||3||

स्पृष्टस्य चैकेन पदासुरस्य महत्पदं मुक्तिरभूत्किलास्य |
स्पर्शेऽन्यपादस्य फलं हि दातुं नास्तीत्यतो व्योम्नि दधासि चान्यं ||4||

इति शृंगेरि श्रीजगद्गुरु श्रीसच्चिदानंदशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचिता श्रीपार्वतीश्रीकंठस्तुतिः संपूर्णा |